# ॥ श्रीनीलस्तोत्रम् ॥

.. shrInIlastotram ..

sanskritdocuments.org

July 26, 2016

# Document Information

Text title : nIlastotram
File name : nIlastotra.itx
Location : doc_deities_misc
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Ankur Nagpal ankurnagpal108 at gmail.com
Proofread by : Ankur Nagpal, NA
Source : Nilamata Purana Verses 442-460
Latest update : March 18, 2016
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

# ॥ श्रीनीलस्तोत्रम् ॥

॥ अथ श्रीनीलस्तोत्रम् ॥

चन्द्रदेव उवाच -
नमस्ते नागराजेन्द्र नील नीलोत्पलद्युते ।
नीलमेघचयप्रेक्ष नीलतोलकृतालय ॥ १॥

फणानां त्वं शतैर्नाग शोभसे सप्तभिः सदा ।
सप्तसप्तिरिवार्चिस्माभ्राजसे त्वं गभस्तिभिः ॥ २॥

त्वं नील नीलभ विनीतपापैर्देवेश देवैरपि नेक्ष्यसे त्वम् ।
नागेन्द्र भोगीन्द्र इवाम्बरस्थो ध्यानेन् विद्वद्भिरपीहमानः ॥ ३॥

त्वं नील योगेश इवासनस्थो वेदार्थविद्भिर्विविधैर्विधानैः ।
संसारकार्येषु सुरायकृद्भिराराध्यसे मोक्षफलाय विप्रैः ॥ ४॥

नागेश नीलार्चिरिवामरेशैर्विज्ञायसे सूर्य इवाम्बरस्थः ।
त्वं नील नीलार्चिरिवोज्वलश्च सुभक्तकार्याणि विधास्यमानः ॥ ५॥

दृष्टो मया कारणमेव देव भूमीसकाशात्पतता बलेन ।
स्मृतोर्चितो मोचय मेऽतिदुःखात्त्रायस्व मां भोगिपते नमस्ते ॥ ६॥

त्वं नील नीरौघचयप्रकाशो विराजसे विष्णुरिवामरेशः ।
विधिर्विधाता रमसे फणीश त्वां वासुदेवं प्रणतोऽस्मि नित्यम् ॥ ७॥

त्वां नीलनीलाम्बर नीलनत्रमाकाशवत्सर्वगतं सुरेशम् ।
ध्यायन्नरो योऽप्यजितेन्द्रियो वा नागेन्द्र मुच्येत तव प्रसादात् ॥ ८॥

नील त्वामेव वेदार्थे जगुर्वेदाः सनातनम् ।
देवं बहु मुमुक्षूणां कामिनां चार्तसाधनम् ॥ ९॥

त्वत्प्रकाशं यतो ब्रह्म निर्मलं निष्फलं परम् ।
सूक्ष्मतो व्योमनिर्दिष्टं सर्वगात्रैरकृत्रिमम् ॥ १०॥

अकिंचनो वदान्यस्त्वमति सूक्ष्मोऽसि च पृथुः ।
अर्थाश्रयो महार्थस्त्वं स्तव्यस्तस्याक्षरस्य च ॥ ११॥

कुद्रूः पुत्र सहस्रेण नागराजेन्द्रशोभिता ।
त्वया तु राजतेऽत्यर्थं विष्णुनैवादितिर्यथा ॥ १२॥

त्वमेव तपसाऽत्यर्थं तथा विद्योतसे प्रभो ।
तोयं हिमं शीकरांश्च तथा मुञ्चसि धार्मिक ॥ १३॥

प्रजापतिः कश्यपो हि सर्वभूतपिता प्रभुः ।
त्वया तु शोभतेऽत्यर्थं पुत्रेणात्यन्तधार्मिकः ॥ १४॥

त्वयि धर्मश्च सत्यं च क्षमा च सततं प्रभो ।
देवासुरविमर्देषु शतशोऽथ सहस्रशः ॥ १५॥

त्वया विनिहता दैत्या देवब्राह्मणकण्टकाः ।
वरदस्त्वं वरेण्यश्च बलारिर्बलहा विभुः ॥ १६॥

भक्तानुकम्पी भक्तश्च देव देवे जनार्दने ।
तस्यातिदयितश्चासि यथा नागः स वासुकिः ॥ १७॥

धनदस्ते सखा नाग यथा शर्वस्य नित्यदा ।
धनदश्चासि भक्तानां धनेश इति विश्रुतः ॥ १८॥

नागानां त्वं गतिर्नित्यं देवानामिव वासवः ।
भक्तिमानस्मि ते नित्यं त्वं च जानासि धार्मिक ॥ १९॥

॥ इति श्रीनीलमतपुराणे नीलस्तोत्रम् सम्पूर्णम् ॥

Encoded and proofread by Ankur Nagpal ankurnagpal108 at gmail.com
NA

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

.. shrInIlastotram ..
was typeset on July 26, 2016

Please send corrections to *sanskrit@cheerful.com*